**Jadavpur University**

**B.A. Admission Test in Sanskrit 2019**

**Time: 2 Hours** **Full Marks: 50**

## PART I

**(40 Marks)**

अस्य विभागस्य सर्वे प्रश्नाः समुचितवर्गक्षेत्रेषु √–चिह्नप्रदानेन समाधेयाः। **1X40=40**

१। *स्वप्नवासवदत्तम्* इति केन रचितम्?

☐ भासेन ☐ शूद्रकेण ☐ कालिदासेन ☐ जयदेवेन।

२। *मुद्राराक्षसम्* इति कीदृशी रचना?

☐ नाटकम् ☐ महाकाव्यम् ☐ नीतिशास्त्रम् ☐ गद्यकाव्यम्।

३। *मेघदूत*–काव्यं केन छन्दसा विरचितम्?

☐ इन्द्रवज्रया ☐ शार्दूलविक्रीडितेन ☐ मन्दाक्रान्तया ☐ मालिन्या।

४। *अभिज्ञानशाकुन्तले* कति अङ्काः?

☐ अष्टौ ☐ नव ☐ दश ☐ सप्त।

५। इदं जयदेवेन विरचितम्–

☐ *मेघदूतम्* ☐ *गीतगोविन्दम्* ☐ *स्वप्नवासवदत्तम्* ☐ *किरातार्जुनीयम्* ।

६। वराहमिहिरेण अयं ग्रन्थः प्रणीतः–

☐ *पञ्चतन्त्रम्* ☐ *बृहत्संहिता* ☐ *साहित्यदर्पणः* ☐ *नीतिशतकम्* ।

७। प्रथमः आर्यभटः कस्मिन् समये वर्तमानः आसीत्?

☐ खिस्टिये प्रथमशतके ☐ खिस्टिये पञ्चमशतके ☐ खिस्टपूर्वे प्रथमशतके ☐ खिस्टिये नवमशतके।

८। *चरकसंहिता* कस्य ग्रन्थस्य संपादितं रूपम्?

☐ *पराशरसंहितायाः* ☐ *अग्निवेशतन्त्रस्य* ☐ *सुश्रुतसंहितायाः* ☐ *हारीतसंहितायाः* ।

[Turn over

९। आयुर्वेदे कौमारभृत्यशब्देन कस्य चिकित्सापद्धतिः बोद्धव्या?

□ वृद्धस्य □ पशोः □ वृक्षस्य □ शिशोः।

१०। *हितोपदेशः* केन प्रणीतः?

□ विष्णुशर्मणा □ नारायणेन □ क्षेमेन्द्रेण □ कल्हणेन।

११। बालकः <u>व्याघ्राद्</u> बिभेति – अस्मिन् वाक्ये अधोरेखाङ्किते पदे

□ कर्मकारकम् □ करणकारकम् □ अधिकरणकारकम् □ अपादानकारकम्।

१२। राजा ___ भिक्षां ददाति–

□ दरिद्रस्य □ दरिद्राय □ दरिद्रे □ दरिद्रात्।

१३। पिता ____ सह गच्छति।

□ पुत्रेण □ पुत्राय □ पुत्रे □ पुत्रात्।

१४। माता च पिता च इति

□ मातृपितरौ □ पितृमातरौ □ मातापितरौ □ मातरौ।

१५। अन्यो देशः इति

□ देशान्यः □ देशान्तरः □ देशान्तरम् □ प्रदेशः।

१६। ना सिंह इव इति

□ नरसिंहः □ नृसिंहः □ नासिंहः □ नसिंहः।

१७। कदन्नम् इत्यस्य व्यासवाक्यं भवति

□ कदलीमिश्रितम् अन्नम् □ कुत्सितम् अन्नम् □ कर्दमाक्तम् अन्नम् □ कदापि लब्धम् अन्नम्।

१८। द्यौश्च पृथिवी च तयोः =

□ द्यावापृथिवी □ द्यावापृथिव्या □ द्यावापृथिव्योः □ द्यावापृथिव्याः।

१९। हरौ इति –

□ अधिहरि □ उपहरि □ अपहरि □ अभिहरि।

२०। पाशुपत इत्यत्र पशुपतिशब्दात् कः प्रत्ययः?

□ ढक् □ इमनिच् □ अण् □ तरप्।

२१। शास्त्रं पठसि ---, ज्ञानं लभेथाः।

□ सकृत् □ एकदा □ न □ चेत्।

२२। अयम् एषाम् अतिशयेन गुरुः इति–

□ गरिष्ठः □ गुरुतरः □ गरीयान् □ गरीयसी।

२३। विद्युत् अस्मिन् अस्ति –

□ विद्युद्वान् □ विद्युन्मान् □ विद्युत्वान् □ विद्युत्मान्।

२४। राजा शत्रून् ------।

□ पराजयते □ पराजयति □ पराजयतः □ पराजयन्ते।

२५। शीतार्ताः जनाः करान् -------।

□ उत्तपति □ उत्तपन्ते □ उत्तपते □ उत्तपन्ति।

२६। धूमः गृहम् ------।

□ आक्रामन्ति □ आक्रामति □ आक्रामते □ आक्रमन्ते।

२७। उत्तमः शिष्यः गुरुवचनं न कदापि -----।

□ उच्चरेते □ उच्चरतः □ उच्चरति □ उच्चरते।

२८। √अस् + णिच् + लट् उत्तमपुरुषैकवचनम्=

□ आसयामः □ भावयति □ भावयामि □ आसयेत्।

२९। √ग्रह् + सन् + लोट् मध्यमपुरुषद्विवचनम्=

□ जिघृक्षतम् □ जिघांसतम् □ जिगमिषतम् □ जिगीषतम्।

३०। पुनः पुनः गच्छन्ति इति

□ जङ्गम्यते □ जुगुप्सते □ जङ्गम्यन्ते □ जिगमिषन्ति।

[Turn over

2024.05.20

३१। आत्मनः पुत्रम् इच्छति इति

□ पुत्रीयते □ पुत्रीयति □ पुत्रयते □ पुत्रयति।

३२। महत् हिमम् इति

□ हैमम् □ हिमानी □ हैमवती □ हैमवतम्।

३३। यवनानी इत्यस्यार्थः

□ यवनजातीया नारी □ यवनानां भाषा □ यवनानां लिपिः □ यवनस्य पत्नी।

३४। √विद् + तव्य + पुंलिङ्गे द्वितीयाविभक्तौ द्विवचने रूपम्–

□ वेत्तव्ये □ वेत्तव्यौ □ वेदितव्ये □ वेदितव्यौ।

३५। पाणी पादौ च तेषां समाहार इति–

□ पाणिपादाः □ पाणिपादौ □ पाणिपादम् □ पाणिपादे।

३६। मनीषा इत्यत्र संधिः एवं विश्लिष्यते–

□ मने + ईषा □ मनी + ईषा □ मनस् + ईषा □ मनो + ईषा।

३७। शूद्री भवति

□ शूद्रपत्नी □ शूद्रजातीया रमणी □ शूद्रस्य वृत्तिः □ शूद्रस्य जननी।

३८। <u>दाशरथिना</u> बाणेन हतो दशाननः इत्यत्र रेखाङ्कितपदे

□ करणकारकम् □ कर्तृकारकम् □ संप्रदानकारकम् □ अधिकरणकारकम्।

३९। मत्स्यशब्दस्य स्त्रियाम् इदं रूपं भवति–

□ मत्स्यी □ मत्स्या □ मत्सी □ मत्सा।

४०। ननान्दृ–शब्दस्य द्वितीयायां बहुवचने रूपं भवति–

□ ननान्दरः □ ननान्दॄः □ ननान्दृः □ ननान्दरान्।

## PART II

**(10 Marks)**

**अस्य विभागस्य सर्वे प्रश्नाः प्रश्नपत्रे प्रदत्ते शून्यस्थाने एव समाधेयाः।**

१। अधोलिखितं संदर्भं सावधानं पठित्वा प्रदत्ताः प्रश्नाः सुरगिरा देवनागरीम् आश्रित्य समाधेयाः। **1X5=5**

अस्ति मगधदेशे चम्पकवती नामारण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत् -आः, कथमेतन्मांसं सुललितं भक्षयामि। भवतु। विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत् - मित्र, कुशलं ते? मृगेणोक्तम् - कस्त्वम्? स ब्रूते क्षुद्रबुद्धिनामा जम्बुकोऽहम्।

प्रश्नाः-

क) मगधदेशे का नाम अरण्यानी?

ख) मृगकाकौ इत्यस्य व्यासवाक्यप्रदर्शनपूर्वकं समासो निर्णेयः।

ग) मृगं दृष्ट्वा शृगालः किम् अचिन्तयत्?

घ) शृगालस्य यः पर्यायः (समार्थकः शब्दः) अत्र उच्यते स उल्लेख्यः।

ङ) संधिविच्छेदः कार्यः - केनचिच्छृगालेनावलोकितः।

उत्तराणि

[ Turn